# Santanagopala Mantra Prayogah

# સન્તાનગોપાલમન્ત્રપ્રયોગઃ

## Document Information

Text title : Santanagopala Mantra PrayogaH

File name : santAnagopAlamantraprayogaH.itx

Category : vishhnu, krishna, mantra

Location : doc_vishhnu

Transliterated by : Paresh Panditrao

Proofread by : Paresh Panditrao

Latest update : October 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 14, 2022

*sanskritdocuments.org*

# સન્તાનગોપાલમન્ત્રપ્રયોગઃ

અથ સન્તાનગોપાલમન્ત્રપ્રયોગઃ -
મૂલમન્ત્રો યથા -
ૐ ક્લીં શ્રીં હ્રીં જીં ૐ ભૂર્ભુવઃ સ્વઃ ૐ ।
દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥

ૐ સ્વઃ ભુવઃ ભૂઃ ૐ જીં હ્રીં શ્રીં ક્લીં ૐ ।
ઇતિ ચતુઃપઞ્ચાશદ્વર્ણાત્મકો મન્ત્રઃ ।

ૐ અસ્ય શ્રીસબીજસન્તાનગોપાલમન્ત્રસ્ય નારાયણ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, પુત્રપ્રદશ્રીગોપાલો દેવતા, ક્લીં બીજં, શ્રીં હ્રીં
શક્તિઃ, જીં કીલકમ્, શ્રીસન્તાનગોપાલપ્રસાદસિદ્ધિપૂર્વકં મમ
(યજમાનસ્ય વા) ચિરાયુઃ-પુત્ર-પ્રાપ્ત્યર્થે જપે વિનિયોગઃ ॥

ૐ નારાયણઋષયે નમઃ શિરસિ ।
ૐ અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
ૐ પુત્રપ્રદશ્રીગોપાલદેવતાયૈ નમઃ હૃદિ ।
ૐ ક્લીં બીજાય નમઃ ગુહ્યે ।
ૐ શ્રીં હ્રીં શક્તયે નમઃ પાદયોઃ ।
ૐ જીં કીલકાય નમઃ સર્વાઙ્ગે ।
ઇતિ ઋષ્યાદિન્યાસઃ ॥

ૐ દવકીસુત ગોવિન્દ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ વાસુદેવ જગત્પતે તર્જનીભ્યાં નમઃ ।
ૐ દેહિ મે તનયં કૃષ્ણ મધ્યમાભ્યાં નમઃ ।
ૐ ત્વામહં શરણં ગતઃ અનામિકાભ્યાં નમઃ ।
ૐ દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ

કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

ૐ દેવકીસુત ગોવિન્દ હૃદયાય નમઃ ।
ૐ વાસુદેવ જગત્પતે શિરસે સ્વાહા ।
ૐ દેહિ મે તનયં કૃષ્ણ શિખાયૈ વષટ્ ।
ૐ ત્વામહં શરણં ગતઃ કવચાય હું ।
ૐ દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ, અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિન્યાસઃ ॥

ઇતિ નેત્રહીનં પઞ્ચાઙ્ગન્યાસં કૃત્વા ધ્યાયેત્ -
ૐ વૈકુણ્ઠતેજસા દીપ્તમર્જુનેન સમન્વિતમ્ ।
સમર્પયન્તં વિપ્રાય નષ્ટાનાનીય બાલકાન્ ॥

(અથવા)
વિજયેન યુતો રથસ્થિતઃ પ્રસમાનીય સમુદ્રમધ્યતઃ ।
પ્રાદદત્તનયાન્ દ્વિજન્મને સ્મરણીયો વસુદેવનન્દનઃ ॥

ઇતિ ધ્યાત્વા માનસોપચારૈઃ(૧) સમ્પૂજ્ય જપં કુર્યાત્ ।
લક્ષચતુષ્ટયજપે પુત્રાપ્તિઃ ॥

(૧ માનસોપચારૈઃ એવં અત્ર નૈવેદ્યમપિ
માનસં પરિકલ્પયેદિતિ મહાર્ણવઃ)

ઇતિ સન્તાનગોપાલમન્ત્રપ્રયોગઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Paresh Panditrao

*Santanagopala Mantra Prayogah*

pdf was typeset on October 14, 2022

Please send corrections to *sanskrit@cheerful.com*